अधिकरणं च यस्य गुणादेर्यो धर्म्मी स एव। यथा गुणकर्म-जातीनां द्रव्यम्, द्रव्यस्य च संयोगादिसम्बन्धेन द्रव्यान्तरं, तत्राधिकस्यैवाधिकरणत्वं यथा कुण्डादेर्वदरादीनामधिकरणत्वम् गृहादेर्घटादीनां, न तु वैपरीत्ये। द्रव्यादिषु गुणादेरेव, समवायेन तादात्म्येन वा मतभेदेन अधिकरणत्वं नतु गुणादीनां द्रव्याधिकरणत्वमित्येव मन्तव्यम्। क्रियते निर्णयार्थं विचारोऽस्मिन्। पूर्व्वोत्तरमीमांसाशास्त्रप्रसिद्धे एकार्थप्रतिपादके विषयसंशयपूर्व्वपक्षसिद्धान्त निर्णयात्मकपञ्चाङ्गबोधकवाक्यसमुदाये न्याये। तथा हि "विषयोविशयश्चैव पूर्व्वपक्षस्तथोत्तरं निर्णयश्चेति"सिद्धान्तः शास्त्रेऽधिकरणं स्मृतमिति" मीमांसा। तत्र विचारार्हं वाक्यं विषयः, तस्यार्थविषये विशयः इदमित्थं न वेति विकल्पः। तत्र सन्दिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्व्वपक्षवाक्यं, पूर्वपक्षोक्तां युक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शनवाक्यम् सिद्धान्तः। ततश्चेत्याद्यभिलापेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णायकवाक्यमिति यथा "स्वाध्यायोऽध्येतव्य" इत्यादिवाक्यं विचारार्थत्वेन विषयः। अत्राध्ययनमक्षरग्रहणमात्रम्? अर्थग्रहणपर्य्यन्ताध्ययनं? वेति संशयः। तत्र अक्षरग्रहणमात्रमध्ययनमिति पूर्व्वपक्षः। अर्थज्ञानसहिताक्षरग्रहणमिति सिद्धान्तः। तेन विधिवाक्यस्य सार्थवेदाध्ययनमेव फलितोऽर्थ इति निर्णय इत्थं तत् प्रतिपादकावयवपञ्चात्मकोन्यायोऽत्रावसीयते। एवमन्यदप्युदाहार्य्यम्। उत्तरमीमांसायामपि एतानि यथायथं योज्यानि विशेषस्त्वयं वेदान्ते पञ्चावयवा अन्यविधा यथोक्तं माधवाचार्य्येण। "तत्रैकैकमधिकरणं पञ्चावयवं विषयः सन्देहः सङ्गतिः पूर्व्वपक्षः सिद्धान्तश्चेति पञ्चावयवा इति" सङ्गतिश्च "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरुह्यता"मित्यनेन सङ्गतित्रैविध्यं तेनैव दर्शितं तद्विवरणं सङ्गतिशब्दे वक्ष्यते। तत्र वेदान्ताधिकरणं यथा "अथातो ब्रह्मजिज्ञासेति प्रथमाधिकरणम् "अविचार्य्यं विचार्य्यं वा ब्रह्माध्यासानिरूपणात्। असन्देहाफलत्वाभ्यां न विचारं तदर्हति। अध्यासोऽहंबुद्धिसिद्धोऽसङ्गं ब्रह्म श्रुतीरितम् सन्देहान्मुक्तभावाच्च विचार्य्यं ब्रह्म वेदत" इति माधवः। व्याख्यातञ्च तत् स्वेनैव यथा "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इत्यत्र आत्मदर्शनं फलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि तात्पर्य्यं निर्णेतुमनुकूलोन्यायविचारः तदेतद्विचारविधायकं वाक्यं विषयः। न चायं विषयः श्लोकयोर्न संगृहीतः, सन्देहसंग्रहेणैवार्थात् तत् संग्रहप्रतीतेः ब्रह्मविचारात्मकन्यायनिर्णयात्मकशास्त्रमनारम्भणीयमारम्भणीयं वेति सन्देहः। पूर्व्वोत्तरपक्षयुक्तिद्वयं सर्व्वत्र सन्देहबीजमुन्नेयम्। तत्रानारम्भ्यमिति तावत्प्राप्तं विषयप्रयोजनयोरभावात्। संदिग्धं हि विचारविषयोभवति ब्रह्म त्वसन्दिग्धं तथा हि तत् किं ब्रह्माकारेण सन्दिह्यते? आत्माकारेण? वा, नाद्यः "सत्यं ज्ञानमनन्तं ब्रह्मेति"वाक्येन ब्रह्माकारस्य निश्चयात्। न द्वितीयः अहंप्रत्ययेनात्माकारस्य निश्चयात्। अध्यासात्मविषयत्वेन भ्रान्तोऽयं प्रत्यय इति चेत् न अध्यासानिरूपणात् तमःप्रकाशवद्विरुद्धस्वभावयोर्जडाजडयोर्देहात्मनोः शुक्तिरजतवदन्योन्यतादात्म्याध्यासोन निरूपयितुं शक्यते। तस्मादभ्रान्ताभ्यां श्रुत्यहंप्रत्ययाभ्यां निश्चितस्यासंदिग्धत्वान्न विचारस्य विषयोऽस्ति। नापि प्रयोजनं पश्यामः। उक्तप्रकारेण ब्रह्मात्मनिश्चयेऽपि मुक्त्यदर्शनात् तस्माद्ब्रह्म न विचारमर्हति अतः शास्त्रमनारम्भणीयमिति पूर्व्वपक्षः। अत्रोच्यते। शास्त्रमारम्भणीयं विषयप्रयोजनसद्भावात् श्रुत्यहंप्रत्यययोः सन्दिग्धं ब्रह्मात्मवस्तु। "अयमात्मा ब्रह्मेति" श्रुतिरसङ्गं ब्रह्मात्मत्वेनोपदिशति। अहंमनुष्यइत्याद्यहं बुद्धिर्देहादितादात्म्याध्यासेनात्मानं गृह्णाति, अध्यासस्यदुर्निरूपत्वमलङ्काराय, तस्मात् संदिग्धं वस्तु विषयः तन्निश्चयेन मुक्तिलक्षणं प्रयोजनं श्रुत्या, विद्वदनुभवेन च सिद्धम्। तस्माद्वेदान्तवाक्यविचारमुखेन ब्रह्मणो विचारार्हत्वाच्छास्त्रमारम्भणीयमिति सिद्धम् इति"। अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकशब्दे च। "समानाधिकरणस्तत्पुरुषः कर्मधारय"इति पा०। समानाधिकरणः अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकपदघटितस्तत्पुरुषः कर्मधारय इत्यर्थः "तादृशपदघटितत्वेनान्यपदार्थत्वे समानाधिकरणबहुव्रीहिः पीतमम्बरं यस्येति वाक्ये पीताम्बर इत्यादि। अभेदान्वयिपदार्थबोधकभिन्नपदघटितत्वे व्यधिकरणबहुव्रीहिरिति यथा पद्मं नाभौ यस्येति वाक्ये पद्मनाभः। सुश्रुतोक्तेषु द्वात्रिंशत्तन्त्रयुक्तिषु तन्त्रयुक्तिभेदे च तन्त्रयुक्तिशब्दे तद्विवरणम्।

**अधिकरणविचाल** पु० अधिकरणस्य विचालः अन्यथाकरणं वि—चल घञ् इत०। द्रव्यस्य अवस्थान्तरकरणेन संख्यान्तरकरणे, विचालो नाम यदेकमनेकं क्रियते अनेकं वैकं क्रियते इति। एकस्य राशेः पञ्चधा विभागे, पञ्चात्मकस्य वा एकधा विभागे च अधिकरणस्य संख्याया विचालः। "अधिकरणविचाले चेति" पा०।